# श्रुतिगीता २

## shrutigItA 2

sanskritdocuments.org

March 17, 2018

shrutigItA 2

# श्रुतिगीता २

## Sanskrit Document Information

Text title : shrutigItA 2

File name : shrutigItA2.itx

Category : giitaa, vishhnu, krishna, puShTimArgIya, gItA, vallabhaachaarya

Location : doc_giitaa

Author : vallabhAchArya

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 17, 2018

*sanskritdocuments.org*

# श्रुतिगीता २

प्राकृताः श्रुतयः सर्वा भगवन्तमधोक्षजम् ।
स्तुवन्ति दोषनाशाय तत्राविष्टो भवेद्यथा ॥ १॥

सत्यो हरिः समस्तेषु भ्रमभातेष्वपि स्थिरः ।
अतः सन्तः समस्तार्थे कृष्णमेव विजानते ॥ २॥

कथानन्त्योक्तिहृदयाः साधनानि न कुर्वते ।
साक्षात्ते पादसंश्लिष्टास्ते किं वाच्या महाशयाः ॥ ३॥

कृष्ण एव सदा सेव्यो निर्णीतः पञ्चधा बुधैः ।
शरीरदः प्रेरकश्च सुखदः शेषसत्पदः ॥ ४॥

कर्मरूपं हरिं केचित्सेवन्ते योगरूपिणम् ।
तेभ्योऽप्यक्षररूपस्य सेवकाः सम्मताः सताम् ॥ ५॥

सर्वत्र भगवांस्तुत्यः सर्वदोषविवर्जितः ।
क्रीडार्थमनुकुर्वन्हि सर्वत्रैव विराजते ॥ ६॥

गुप्तानन्दा यतो जीवा निरानन्दं जगद्यतः ।
पूर्णानन्दो हरिस्तस्माज्जीवैः सेव्यः सुखार्थिभिः ॥ ७॥

कृष्णे हरौ भगवति परमानन्दसागरः ।
वर्तते नात्र सन्देहः कथा तत्र नियामिका ॥ ८॥

असत्सङ्गो न कर्तव्यो भक्तिमार्गस्य बाधकः ।
देहे ह्यनुगुणे कृष्णे नेन्द्रियाणां प्रियं चरेत् ॥ ९॥

सर्व एव हरेर्भक्तास्तुल्या यान्मन्यते हरिः ।
अतः कृष्णो यथात्मीयान्मन्यते भजनं तथा ॥ १०॥

ज्ञानमार्गो भ्रान्तिमूलमतः कृष्णं भजेद्बुधः ।
प्रवर्तकं ज्ञानकाण्डं चित्तशुद्ध्यै यतो भवेत् ॥ ११॥

भ्रान्तिमूलतया सर्वसमयानामयुक्तितः ।
न तद्विरोधात्कृष्णाख्यं परं ब्रह्म त्यजेद्बुधः ॥ १२॥

जीवानां ब्रह्मरूपत्वाद्दोषा अपि च मानसाः ।
जगच्च सकलं ब्रह्म ततो दोषः कथं हरौ ॥ १३॥

सर्वथा सर्वतः शुद्धा भक्ता एव न चापरे ।
अतः शुद्धिमभीप्सद्भिस्सेव्या भक्ता न चापरे ॥ १४॥

सुवर्णप्रतिमावासौ सर्वानन्दमयोऽधिराट् ।
सर्वसेव्यो नियन्ता च निर्दुष्टः सर्वथैव हि ॥ १५॥

सर्वभावविनिर्मुक्तः पूर्णः क्रीडार्थमुद्गतः ।
निमित्तं तं समाश्रित्य जायन्ते जीवराशयः ॥ १६॥

नियन्ता जीवसङ्घस्य हरिस्तेनाणवो मताः ।
जीवा न व्यापकाः क्वापि चिन्मया ज्ञानिनो मताः ॥ १७॥

नामरूपप्रपञ्चं हि देवतिर्यङ्नरात्मकम् ।
कृष्णादेव समुद्भूतं लीनं तत्रैव तन्मयम् ॥ १८॥

नृणां दुर्गतिमालोक्य ये सेवन्ते दृढव्रताः ।
कृष्णं तद्भ्रुकुटिः कालो न तान्हन्ति कदाचन ॥ १९॥

अदान्ते मनसि ज्ञानयोगार्थं न यतेद्बुधः ।
गुरुसेवापरो भूत्वा भक्तिमेव सदाभ्यसेत् ॥ २०॥

सर्वलोकोपकारार्थं कृष्णेन सहितास्तु ते ।
परिभ्रमन्ति लोकानां निस्ताराय महाशयाः ॥ २१॥

पुत्रादीन्सम्परित्यज्य कृष्णः सेव्यो न तैः सह ।
तत्सुखं भगवान्दाता ते तु क्लिष्टेऽतिदुःखदाः ॥ २२॥

परिभ्रमंस्तीर्थनिष्ठो गुरुलब्धहरिस्मृतिः ।
न सेवेत गृहान् दुष्टान् सद्धर्मात्यन्तनाशकान् ॥ २३॥

सद्बुद्ध्या सर्वथा सद्भिर्न सेव्यमखिलं जगत् ।
भ्रान्त्या सद्बुद्धिरत्रेति सन्तं कृष्णं भजेद्बुधः ॥ २४॥

खपुष्पादिसमत्वाद्धि मिथ्याभूतं जगद्यतः ।
अधिष्ठानाच्च सद्भानं तं कृष्णं नियतं भजेत् ॥ २५॥

कालादितृणपर्यन्ता न सेव्या मुक्तिमिच्छता ।
दोषत्याजनशक्तो हि सेव्यो दाता गणस्य च ॥ २६॥

जीवेषु भगवानात्मा सञ्च्छन्नस्तेन तत्र न ।
भजनं सर्वथा कार्यं ततोऽन्यत्रैव पूजयेत् ॥ २७॥

सुखसेवापरो यस्तु सदानन्दं हरिं भजेत् ।
अन्यथा सुखमप्रेप्सुः सर्वथा दुःखमाप्नुयात् ॥ २८॥

कृष्णानन्दः परानन्दो नान्यानन्दस्तथाविधः ।
वेदा अपि न तच्छक्ताः प्रतिपादयितुं स्वतः ॥ २९॥

इत्येव श्रुतिगीतायाः सङ्क्षेपेण निरूपितः ।
अर्थराशिसमुद्रो हि यथाङ्गुल्या निरूप्यते ॥ ३०॥

इति श्रीवल्लभाचार्यविरचिता श्रुतिगीता सम्पूर्णा ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrutigItA 2*
pdf was typeset on March 17, 2018

Please send corrections to *sanskrit@cheerful.com*